टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः

सूत्रस्य अर्थः -

अतः इति सर्वत्र अनुवर्तते। तत् सति सम्भवे विशेषणं भवति। टिदादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति। टापो ऽपवादः। टितस्तावत् कुरुचरी। मद्रचरी। इह कस्मान् न भवति, पचमाना, यजमाना? द्व्यनुबन्धकत्वाल् लटः । ल्युडादिषु कथम् ? टित्करणसामर्थ्यात्। इतरत्र तु टेरेत्वं फलम्। पठिता विद्या इति ? आगमटित्त्वम् अनिमित्तं, ट्युट्युलौ तुट् च इति लिङ्गात्। ढ सौपर्णेयी। वैनतेयी। निरनुबन्धको ढशब्दः स्त्रियां न अस्ति इति निरनुबन्धकपरिभाषा न प्रवर्तते। अण् कुम्भकारी। नगरकारी। औपगवी। णे ऽपि क्वचिदण्कृतं कार्यं भवति। चौरी, तापसी। दाण्डा, मौष्टा इत्यत्र न भवति। अञ् औत्सी। औदपानी। शार्ङ्गरवाऽद्यञो ङीन् इति पुनरञो ग्रहणं जातिलक्षणं ङीषं बाधितुम्। द्वयसच् ऊरुद्वयसी। जानुद्वयसी। दघ्नच् ऊरुदघ्नी। जानुदघ्नी। मात्रच् ऊरुमात्री। जानुमात्री। तयप् पञ्चतयी। दशतयी। ठक् आक्षिकी। शालाकिकी। ठञ् लावणिकी। ठक्ठञोर् भेदेन ग्रहणं ठनादिनिवृत्त्यर्थम्। कञ् यादृशी। तादृशी। क्वरप् इत्वरी। नश्वरी। ख्युन् आढ्यङ्करणी। सुभगंकरणी। नञ्स्नञीकक्तरुणतलुनानाम् उपसङ्ख्यानम्। स्त्रैणी। पौंस्नी। शाक्तीकी। याष्टीकी। तरुणी। तलुनी।

**सिद्धान्त-कौमुदी**

अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात्। कुरुचरी। उपसर्जनात्वान्नेह बहुकुरूचरा। नदट्, नदी। वक्ष्यमाणेत्यत्र टित्त्वादुगित्त्वाच्च ङीप् प्राप्तः।

यासुटो ङित्त्वेन (प) लाश्रयमनुबन्धकार्यं नादेशानाम् । इति ज्ञापनान्न भवति । श्नः शानचः शित्त्वेन क्वचिदनुबन्धकार्येऽप्यनल्विधाविति निषेधज्ञापनाद्वा । सौपर्णेयी । ऐन्द्री । औत्सी । ऊरुद्वयसी । ऊरुदघ्नी । ऊरुमात्री । पञ्चतयी । आक्षिकी । लावणिकी । यादृशी । इत्वरी ॥ (प)ताच्छीलिके णेऽपि ॥ चौरी ॥ । नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंङ्ख्यानम् (वा) ॥ स्त्रैणी । पौंस्नी । शाक्तीकी । आढ्यङ्करणी । तरुणी । तलुनी ॥